१ श्रीमते रामानुजाय नमः ॥ यो नित्यमच्युतपदांबुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणा
य मेने अस्मद्गुरोर्भगवतोस्य दयैकसिंधो रामानुजस्य चरणौ शरणं प्रपद्ये १ लक्ष्मीपतेर्य
1 तिपतेश्च दयैकधाम्नो योसौ पुरा समजनिष्ट जगद्धितार्थं प्राच्यं प्रकाशयतु नः परमं रहस्यं
संवाद एष शरणागतिमंत्रसारः ॐ भगवन्नारायणाभिमतानुरूपस्वरूपरूपगुणविभवैश्व
र्यशीलाद्यनवधिकातिशयासंख्येयकल्याणगुणगणां पद्मवनालयां भगवतीं श्रि
यं देवीं नित्यानपायिनीं निरवद्यां देवदेवदिव्यमहिषीमखिलजगन्मातरमस्म
न्मातरमशरण्यशरण्यामनन्यशरणः शरणमहं प्रपद्ये १ पारमार्थि १

श्री रंगराजप्राप्त्यै
नागद्याम्पादुनाचा
र्ध ग्रंथं-चप्रार भ्रंते ॥

प. सं. १-१०

२ सौकुमार्यलावण्ययौवनाद्यनंतकल्याणगुणगणनिधिदिव्यरूपस्वाभाविकानवधिकातिशय
ज्ञानबलैश्वर्यवीर्यशक्तितेजःसौशील्यवात्सल्यमार्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्यगंभीर्यौ
2 दार्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामसत्यसंकल्पकृतित्वकृतज्ञताद्यसंख्येयकल्या ९
णगुणगणौघमहार्णवस्वोचितविविधविचित्रानंताश्चर्यनित्यनिरवद्यनिरतिशयसुगंधनि
रतिशयसुखस्पर्शनिरतिशयौज्ज्वल्यकिरीटमुकुटचूडावतंसमकरकुंडलग्रैवेयकहारकेयूर
कटकश्रीवत्सकौस्तुभमुक्तादामोदरबंधनपीतांबरकांचीगुणनूपुराद्यपरिमितकल्याण
२

कभगवच्चारणारविंदयुगलैकांतिकात्यंतिकपरज्ञानपरमभक्तिकृतपरिपूर्णा
नवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवज
नितानवधिकातिशयप्रीतीकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैंकर्यप्रा
प्त्यपेक्षयापारमार्थिकीभगवच्चरणारविंदयुगलशरणागतिर्यथावस्थिताविरतास्तुमेऽस्तुतेतयैवसर्वंसं
पद्यतेऽखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणानंतज्ञानानंदैकस्वरूप ९
स्वाभिमतानुरूपैकरूपाचिंत्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौज्वल्यसौंदर्यसौगंध्य ९

३

स्थानसमृद्धानंताश्चर्यानंतमहाविभवानंतपरिमाणनित्यनिरवद्यनिरतिश
यश्रीवैकुंठनाथस्वसंकल्पानुविधायिस्वरूपस्थितिप्रवृत्तिस्वशेषतै
3 कस्वभावप्रकृतिपुरुषकालात्मकविविधविचित्रानंतभोग्यभोक्तृवर्गभोगो
पकरणभोगस्थानरूपनिखिलजगदुदयविभवलयलीलसत्यकामसत्य
संकल्पपरब्रह्मभूतपुरुषोत्तममहाविभूतेश्रीमन्नारायणश्रीवैकुंठनाथअ
पारकारुण्यसौशील्यवात्सल्यौदार्यैश्वर्यसौंदर्यमहोदधेअनालोचितविशे
षाशेषलोकशरण्यप्रणतार्तिहरआश्रितवात्सल्यैकजलधेअनवरतविदितनिखि

३

रिस्वाभूषणः स्वानुरूपाचिंत्यदिव्यशक्तिशंखचक्रगदासिशार्ङ्गाद्यसंख्येयनित्यनिरति
शयकल्याणदिव्यायुधः स्वाभिमतनित्यनिरवद्यानुरूपगुणविभवैश्वर्यशीलाद्यनव
धिकातिशयासंख्येयकल्याणगुणगणश्रीवल्लभ एवंभूतभूमिनीलानायक स्व
च्छंदानुवर्तिस्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्यनिरति
शयज्ञानक्रियैश्वर्याद्यनंतकल्याणगुणगणशेषाशनगरुडप्रमुखनानाविधा
नंतपरिजनपरिचारिकापरिचरितचरणयुगल परमयोगिवाङ्मनसापरिच्छे
द्यस्वरूपस्वभावस्वाभिमतविविधविचित्रानंतभोग्यभोगोपकरणभोग

४

म्येव देव पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् न त्वत्समोस्त्यभ्यधि
कुतोन्यो लोकत्रयेप्यप्रतिमप्रभावः १ तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमी
शमीड्यं पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं मनोकायैरनादिका^
4 लप्रवृत्तानंताकृत्यकरणाकृत्याकरणभगवदपचारभागवतापचारासह्यापचार
रूपनानाविधानंतापचारानारब्धकार्याननारब्धकार्यान्कृतान्क्रियमाणान्^
करिष्यमाणांश्चसर्वानशेषतः क्षमस्वअनादिकालप्रवृत्तं विपरीतज्ञानमात्म^
विषयं कृत्स्नं जगद्विषयं च विपरीतवृत्तं चाशेषविषयमद्यापिवर्ते ० ८० ०

त्वमनन्तजातस्याद्यात्मा अशेषचराचरभूतानिरवोलानियमननिरत अशेषचिदचिद्वस्तु
शेषिभूतानिखिलजगदाधार अखिलजगत्स्वामिन् अस्मत्स्वामिन्सत्यकामसत्यसं
कल्पसकलेतरविलक्षणार्थिकल्पक आपत्सख श्रीमन्नारायण अशरण्यशर
ण्य अनन्यशरणस्त्वत्पादारविंदयुगलं शरणमहं प्रपद्ये अत्र द्वये पितरं मातरं
दारान्पुत्रान्बंधून्सखीन्गुरून्रत्नानि धनधान्यानि क्षेत्राणि गृहाणि सर्व
वंधर्मांश्च संत्यज्य सर्वकामांश्च साक्षरान् लोकविक्रांतचरणौ शरणं तेऽव्रजं विभो त्व
मेव माता च पिता त्वमेव त्वमेव बंधुश्च गुरुस्त्वमेव त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम

५

यभगवदनुभवोहं तथाविधभगवदजनितानवधिकातिशयप्रीतिकारिताश

षावस्थोचिताशेषशेषतैकरतिरूपनित्यकिंकरो भवानि एवंभूतमात्कैंकर्य

प्राप्युपायतयावलृप्तसमस्तवस्तुविहीनोप्यनंततद्विरोधिपापाक्रांतोप्यनं

5 तमदपचारयुक्तोप्यनंतमहीयापचारयुक्तोप्यनंतासह्यापचारयुक्तोप्येत

त्कार्यकारणभूतानादिविपरीताहंकारविमूढात्मस्वभावोप्येतदुभयकार्यकारणभू

तानादिविपरीतवासनासंबद्धोप्येतदनुगुणप्रकृतिविशेषसंबं ५

मानं कीर्तिं व्यतिमालांवा शेषतः सर्वं तमसत्त्वमदीयानादिकर्मप्रवाह त्वत्तो भगवत्स्वरूपतिरोधानकरी
विपरीतज्ञानजननीं सा विचित्रपापात्प्र भोग्यवुद्धेर्जननीति देहेंद्रियस्वेन भोग्य प्रसंगेन स्तदनरूपेण चा स्थिता दैवी
गुणमयी मायादासमरूता: शरणागतो स्मिन्नवास्मि दास इतिवक्ता तं मोतारयते मां ज्ञानी नित्ययुक्त एकभ
क्तिर्विशिष्यते प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रिय सादि श्लोकत्रयोदितज्ञानिनं मां कुरु स्वपुरुषः
सपरः पार्थ भक्त्यालभ्यस्त्वनन्यया भक्त्या त्वनन्यया शक्यामदतिं भक्तेपरां १ इति स्पष्टं त्रयोदी
तपरमभक्तियुक्तं मां कुरु स्व परभक्तिपरज्ञानपरमभक्त्यैकस्वभावं मां कुरु स्व परभक्तिपरज्ञा
नपरमभक्तिकृतमारिपद्योनवरतानित्यविशदतमानन्यप्रयोजनावधिकातिशयप्रि

६

कांतैकात्स्यंतैकपरमानिवरज्ञानपरमनन्ति मैत्र्यसादादेवमनादात्तनमपावसित
स्तत्वस्वरूपस्वरूपगुणविभ्निलीलोपकरणकैकैस्तारोपरोद्दत्तसिद्धिमत्रिमाम्यतपमहासे
नप्रियः पारेषुणानवरतनित्यविशदतमोनन्यप्रयोजनानवधिकातिशयप्रियम
6 दनुभवस्तत्पोविधमदनुभवजनितानवधिकातिशयप्रीतिकारितापेपशेतैक
रतिरूपनित्यविंकरोभवदेवंभतोसिस्त्राधमाक्रिकाचिमोतिकाचिदैविकदुःख
विघ्नसर्धरहितस्वदमम पीनुसधानेनुसहसदैवंवत्तापावस्थैरयानमेवश्रोमुगे
स्तरवमान्त्वशशीरणातसमनेतुरेवतमरपेवरपपानित्रकुहोमामेवावतेकपात्रप्रके ६
तपदेसंसारमनोरथोजीतामेवक्तमखेवनेवेमावकेलितस्तुतमसमैरूपदिसंजे
तदानोमेवमतस्तसादतधभजरागविदपुगतेकातिकोसानेकप ५८०८१८० राम

धोमेतन्मलाद्यमालिकाधिमौतिका धिदै विकसुखदुःखलहेलुतदित्त
रोपेनाशीवदिवपानुभवज्ञानसंकोचरुपमज्ञकरागारविंदयुगलेकां
तिकात्स्येत्तिकपरभक्तिपरज्ञानपरमभक्तिविघ्नप्रतेदतोपियेनके
नापिप्रकारेणा द्वयवर्त्तोत्वंकैवलंमदीयैषदपवानिःशेषविनष्टानिष
सहेतुकमज्ञरागारविंदयुगलेकांतिकात्स्यंतिकपरभक्तिपरभक्तिपरज्ञा
नपरमभक्तिर्भेत्त्वसांपदेवसाद्गुणातानविघ्नोमम्मसादलघुमज्ञरागारविंदयुगले

२ ंनमोस्तुते मति श्रीरंगराजस्य [illegible] नागदं ॥ यामुनार्य्यसुधांभोधिमवगाह्य यथामति ।
मादाय भक्तियोगाख्यं रत्नं संदर्शयाम्यहं ॥ स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थिति
प्रवृत्तिभेदं क्लेशकर्माद्यशेषदोषासंस्पृष्टं स्वाभाविकानवधिकातिशयज्ञानबलैश्व
र्यवीर्यशक्तितेजः प्रभृत्यसंख्येयकल्याणगुणगणौघमहार्णवं परमपुरुषं भगवंतं ना
रायणं स्वामित्वेन गुरुत्वेन सुहृत्वेन च परिगृह्य ऐकांतिकात्यंतिकतत्पादांबुजद्वयपरिचर्यैक
मनोरथः तत्प्राप्तये च तत्पादांबुजद्वयप्रपत्तेरन्यन्न मे कल्पकोटिसहस्रेणापि साध
नमस्तीति मन्वानस्तस्यैव भगवतो नारायणस्याखिलसत्त्वदयैकसागरस्य अनालोचितगुण
गणाखंडजनानुकूलमर्यादाशीलवतः स्वाभाविकानवधिकातिशयगुणवत्तया । २

त्यतिकैंकर्यैकरतिरूपनित्यदास्यं दास्यतीति महाविश्वासपूर्वकं भगवंतं नित्यकिंकरतां प्रार्थयेत वा
नुभूतिसंभूतप्रीतिकारितदासतां देहि मे कृपया नाथ नजाने गतिमन्यथा सर्वावस्थोचिताशेषशे
षतैकरतिस्तव भवेयं पुंडरीकाक्ष त्वमेवैवं कुरुष्व मां एवंभूततत्त्वयाथात्म्यावबोधतदिच्छारहि
तस्याप्येतदुच्चारणमात्रावलंबनेनोच्यमानार्थपरमार्थनिष्ठं मे मनस्त्वमेवाद्यैव कारय अपारक
रुणांबुधे अनालोचितविशेषाशेषलोकशरण्य प्रणतार्तिहर आश्रितवात्सल्यैकजलधे अनव
तविदितनिखिलभूतजातयाथात्म्याशेषचराचरभूतनिखिलनियमननिरताशेषचिदचि
द्वस्तुशेषिभूत निखिलजगदाधार अखिलजगत्स्वामिन्नस्मत्स्वामिन् सत्यकाम सत्यसंकल
्प सकलेतरविलक्षण अर्थिकल्पक आपत्सख काकुत्स्थ श्रीमन्नारायण श्रीपुरुषोत्तम श्रीरं
गनाथ मम नाथ नमोस्तु ते अनंतानंतशयन पुराणपुरुषोत्तम रंगनाथ जगन्नाथ नाथ नु

१० रण्यचिंत्यस्वरूपमह्लमावे क्वचैनित्यास्थितैरं नं
मैर्भणामिति वैकुंठेद्रिव्यलोके सनकसनंद
नविधिंबन्धारिचर्य्याकरणयोग्ये र्भगवद
४ नुकूल्यैक भोगैर्दिव्यपुरुषैर्महात्मभिरा
पूरितेषामपि इयत्परिमाणमियदैश्वर्य
मीदृशस्वभावमिति परिच्छेत्तुमयोग्ये दिव्यके
ल्याणरूपं प्रोभिते दिव्योद्यान शतसहस्रकोटिभि १०
राव्रते प्रतिपरिमाणे दिव्यायतनेकमिंपिधिव्व

देवतिर्यङ्मनुष्याद्यखिलजनहृदयानंदस्य आश्रितवात्सल्यैकजलधेर्भक्तजनसंश्लेषै
कभोगस्यनित्यज्ञानक्रियैश्वर्यभोगसामग्रीसमृद्धस्य महाविभूतेः श्रीमच्चरणारविंदयु
९ गलमनन्यात्मसंजीवनेन तद्गतसर्वभावेन शरणमनुव्रजेत ततश्च प्रत्यहमा
त्मोज्जीवनायैवमनुस्मरेत् चतुर्दशभुवनात्मकमंडदशगुणोत्तरं चावरणं
सप्तकं समस्तं कार्यकारणजातमतीत्यवर्त्तमाने परमव्योमशब्दाभिधेये ब्रह्मा
दीनां वाङ्मनसागोचरे श्रीमति वैकुंठे दिव्यलोके सनकसनंदनविधिशिवादिभिः